Guru Paduka Stotram

श्रीगुरुपादुकास्तोत्रम्

SHLOKA · श्लोक

1 अनन्तसंसारसमुद्रतार-
नौकायिताभ्यां गुरुभक्तिदाभ्याम्।
वैराग्यसाम्राज्यदपूजनाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम्॥

Ananta sansara samudra tara-
Naukayitabhyam guru bhakti dabhyam.
Vairagya samrajyada pujanabhyam
Namo namah Shri guru padukabhyam.

2 कवित्ववाराशिनिशाकराभ्यां
दौर्भाग्यदावाम्बुदमालिकाभ्याम्।
दूरीकृतानम्रविपत्तिताभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम्॥

Kavitva varashi nishakarabhyam
Daurbhagya davambuda malikabhyam.
Durikrita namra vipattitabhyam
Namo namah Shri guru padukabhyam.

3 नता ययोः श्रीपतितां समीयुः
कदाचिदप्याशु दरिद्रवर्याः।
मूकाश्च वाचस्पतितां हि ताभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम्॥

Nata yayoh shripatitam samiyuh
Kadachid apy ashu daridra varyah.
Mukash cha vachaspatitam hi tabhyam
Namo namah Shri guru padukabhyam.

4 नालीकनीकाशपदाहृताभ्यां
नानाविमोहादिनिवारिकाभ्याम्।
नमज्जनाभीष्टततिप्रदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम्॥

Nalika nikasha padahritabhyam
Nana vimohadi nivarikabhyam.
Namaj janabhishta tati pradabhyam
Namo namah Shri guru padukabhyam.

5 नृपालिमौलिव्रजरत्नकान्ति-
सरिद्विराजज्झषकन्यकाभ्याम्।
नृपत्वदाभ्यां नतलोकपङ्क्तेः
नमो नमः श्रीगुरुपादुकाभ्याम्॥

Nripali mauli vraja ratna kanti-
Sarid virajaj jhasha kanyakabhyam.
Nripatvadabhyam nata loka pankteh
Namo namah Shri guru padukabhyam.

6 पापान्धकारार्कपरम्पराभ्यां
तापत्रयाहीन्द्रखगेश्वराभ्याम्।
जाड्याब्धिसंशोषणवाडवाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम्॥

Papandhakararka paramparabhyam
Tapa trayahindra khageshvarabhyam.
Jadyabdhi sanshoshana vadavabhyam
Namo namah Shri guru padukabhyam.

7 शमादिषट्कप्रदवैभवाभ्यां
समाधिदानव्रतदीक्षिताभ्याम्।
रमाधवाङ्घ्रिस्थिरभक्तिदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम्॥

Shamadi shatka prada vaibhavabhyam
Samadhi dana vrata dikshitabhyam.
Ramadhavanghri sthira bhakti dabhyam
Namo namah Shri guru padukabhyam.

8 स्वार्चापराणामखिलेष्टदाभ्यां
स्वाहासहायाक्षधुरन्धराभ्याम्।
स्वान्ताच्छभावप्रदपूजनाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम्॥

Svarcha paranam akhileshtadabhyam
Svaha saha yaksha dhurandharabhyam.
Svantach chha bhava prada pujanabhyam
Namo namah Shri guru padukabhyam.

9 कामादिसर्पव्रजगारुडाभ्यां
विवेकवैराग्यनिधिप्रदाभ्याम्।
बोधप्रदाभ्यां द्रुतमोक्षदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम्॥

Kamadi sarpa vraja garudabhyam
Viveka vairagya nidhi pradabhyam.
Bodha pradabhyam druta moksha dabhyam
Namo namah Shri guru padukabhyam.

Text checked against: . Meanings, audio and all scripts at nityapaath.com/guru-paduka-stotram/